मपकर्षात्। अतएव स्पृष्टाभिरित्युक्तं न तु भक्षिताभिरिति।

"स्त्री शूद्रः शुध्यते नित्यं चालनाच्च करोष्ठयोः॥"

इति ब्रह्मपुराणवचनञ्च। याज्ञवल्क्यः।

"प्राश्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्।"

अत्र द्विजस्यैव आचमने ब्राह्मतीर्थोपादानात् स्त्रीशूद्रयोर्ण तेनाचमनम्। एवमेव मिताक्षरायां व्यक्तमुक्तं मरीचिना।

"स्त्रियास्तु दक्षिणं तीर्थं शूद्रजातेस्तथैव च।

सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः॥"इति।

एतदनन्तरं इन्द्रियादिस्पर्शनन्तु ब्राह्मणवदेव। प्रमाणान्तरन्तु वाजसनेयिसामगश्राद्धाह्निकतत्त्वयोरनुसन्धेयम्। इतिवन्द्यघटीयश्रीहरिहरभट्टाचार्य्यात्मज-श्रीरघुनन्दनभट्टाचार्य्यविरचितं शूद्राह्निकाचारतत्त्वं समाप्तम्॥

शूद्रधर्म्मः, पुं, (शूद्रस्य धर्म्मः।) शूद्रस्य शास्त्रविहिताचारः। तस्य विवरणं शूद्रकृत्यशब्दे द्रष्टव्यम्॥

शूद्रप्रियः, पुं, (शूद्राणां प्रियः।) पलाण्डुः। इति राजनिर्घण्टः॥ शूद्रस्य प्रियद्रव्ये, त्रि॥

शूद्रप्रेष्यः, पुं, (शूद्रस्य प्रेष्यः।)शूद्रस्य परिचारकब्राह्मणादिः। इति केचित्॥

शूद्रशासनं, क्ली, (शूद्रस्य शासनम्।) शूद्रस्याधिकारो लेख्यपत्रादिर्व्वा। यथा,—

"स्यादभिख्यन्दिरमणं शाखानगरमित्यपि।

शासनं धर्म्मकीलः स्यात्प्रकृतिः शूद्रशासनम्॥"

इति पुरवर्गे त्रिकाण्डशेषः।

शूद्रा, स्त्री, (शूद्रस्य जातिः। शूद्र+"शूद्रा चामहत्पूर्व्वा जातिः।" इति टाप्।) शूद्रजातिस्त्री। इत्यमरः॥ (यथा, मनुः।३।१३

शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते॥")

शूद्रान्नं, क्ली,(शूद्रस्य अन्नम्।) शूद्रस्वामिकान्नम्। यथा,—

"शूद्रान्ने तु भुक्तेन उदरस्थेन यो मृतः।

स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति॥"

शूद्रान्नं शूद्रस्वामिकान्नम्। इति शुद्धितत्त्वम्॥ अन्यत् शूद्रशब्दे द्रष्टव्यम्॥

शूद्राभार्य्यः,पुं, शूद्रा भार्य्या यस्य सः। शूद्रास्वामी इति व्याकरणम्॥

शूद्रार्त्ता, स्त्री, (शूद्रेण आर्त्ता।) प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका॥

शूद्रावेदी, [न्]पुं, (शूद्रां विन्दतीति। विद्+णिनिः।) शूद्रविवाहकर्त्ता। यथा,—

"शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च।

शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः॥"

इति दायभागः॥

शूद्री, स्त्री, (शूद्रस्य स्त्री। "पुंयोगादाख्यायाम्।" ४।१।४८। इति ङीष्।) शूद्रस्य भार्य्या। इत्यमरः॥ (यथा, याज्ञवल्क्यः।१।९१।

"विप्रात् मूर्द्धाभिषिक्तो हि क्षत्रियायां विशः स्त्रियाम्।

अम्बष्ठः शूद्रयां निषादो जातः पारशवोऽपि वा॥")

शूनः, त्रि,(टु ओ श्वि गतिवृद्ध्योः+क्तः।"ओदितश्च।"८।२।४५। इति निष्ठातस्य नः। "वचिस्वपियजादीनां किति।६।१।१५। इति संप्रसारणम्।) हलः।६।४।२। इति दीर्घः। "श्वीदितो निष्ठायाम्।"७।२।१४। इति इडागमश्च न।) वर्द्धितः। इति व्याकरणम्॥ (यथा, सुश्रुते।५।२।

"दुर्व्वर्णे ह्रियते शूने जायते चास्य शोचने॥"

शून्ये, त्रि। यथा ऋग्वेदे।७।१।११।

मा शूने अग्ने निषदाम नृणाम्॥"

"हे अग्ने! शूने शून्ये पुत्रादिरहिते गृहे मा निषदाम न निवसाम।" इति तद्भाष्ये सायणः)

शूनवान्, [त्] त्रि, (टु ओ श्वि गतिवृद्ध्योः+क्तवतु।)वर्द्धितः। इति व्याकरणम्॥

शूना, स्त्री, (श्वयन्ति मृत्युं गच्छन्ति कीटादयो यत्र। श्वि+क्तः। टाप्।) प्राणिवधस्थानम्। इति हलायुधः॥ पञ्चविधा शूना यथा,—

"पञ्च शूना गृहस्थस्य चुल्ली पेषण्युपस्करः।

कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्॥"

पञ्चशूनापापनाशो यथा, मनुः।

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।

होमो दैवो वलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥

पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।

स गृहेऽपि वसन्नित्यं शूनादोषैर्न लिप्यते॥"

इति प्रायश्चित्ततत्त्वम्॥

अधोजिह्विका। इति हारावली॥

शूनावान्, [न्] पुं, (शूना+मतुप्। मस्य वः।) शूना विद्यते यस्य सः। कसाइ इति भाषा। इति केचित्॥

शून्यं, क्ली, आकाशम्। इति शब्दचन्द्रिका॥ (यथा, भागवते।६।१३।२०।

"स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप।

नीतस्तेनैव शून्याय नीहार इव भानुना॥")

बिन्दु इति हेमचन्द्रः॥

शून्यः, त्रि, अतिशयेन ऊनः। अभावविशिष्टः। असम्पूर्णः। खालि इति पारस्यभाषा। तत्पर्य्यायः। वशिकः २ तुच्छः ३ रिक्तकः ४। इत्यमरः॥ शुन्यम् ५। इति तट्टीकायां भरतः॥

"अविद्यजीवनं शून्यं दिक् शून्या चेदबान्धवा।

पुत्त्रहीनं गृहं शून्यं सर्व्वशून्या दरिद्रता॥"

इति चाणक्यम्॥

(शून्यायै प्राणिहिंसायै हितः रहस्यस्थानत्वात् शूना+यत्। यद्वा, शूने हितम्। श्वन्+"श्वनः सम्प्रसारणं वा च दीर्घत्वम्।५।१।२। इत्यस्य वार्त्तिकोक्त्या यत् सम्प्रसारणं दीर्घत्वञ्च।) निर्ज्जनः। इति मेदिनी॥ (यथा, भट्टिः।१८।२९

"केन संविद्रते नान्यस्त्वत्तो बान्धववत्सलः।

विरौमि शून्यं प्रोर्णौमि कथं मन्युसमुद्भवम्॥")

शून्यमध्यः, पुं, (शून्यं मध्यं यस्य।) नलः।) इति राजनिर्घण्टः॥ शून्यगर्भवस्तुनि, त्रि॥

शून्यवादी, [न्] पुं, (शून्यं वदतीति। वद्+णिनिः।) सौगतः। इति जटाधरः॥ नास्तिकश्च॥

शून्या, स्त्री, नली। इति विश्वमेदिन्यौ॥ महाकण्टकिनी। इति शब्दचन्द्रिका॥ फणीमनसा इति ख्याता। बन्ध्या। इति राजनिर्घण्टः॥

शून्यालयः, पुं,(शून्य आलयः।) निर्ज्जनगृहम्। अत्र शयननिषेधो यथा। "मार्कण्डेयः।

'शून्यालये श्मशाने च एकवृक्षे चतुष्पथे।

महादेवगृहे चापि शर्करालोष्टपांशुषु॥

धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि।

न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम्॥

नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः।

नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा॥'

न स्वपेदित्यर्थः।" इत्याह्निकतत्त्वम्॥

शूपकारः, पुं, (शूपं करोतीति। कृ+अण्।) शूद्राणां पाचकः। यथा,—

"शूद्रपाकोपजीवी यः शूपकार इति स्मृतः।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

अन्यत् दन्त्यसकारादौ द्रष्टव्यम्॥

शूर, ङ य ई स्तम्भे। हिंसे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-स्तम्भे अक०-हिंसे सक०-सेट्। निष्ठायामनिट्।) ङ य, शूर्य्यते। ई, शूर्णः। स्तम्भो जड़ीभावः। इति दुर्गादासः॥

शूर, त् क ङ विक्रमे। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-आत्म०-अक०-सेट्।) ङ, अशूशूरत्। विक्रमः उद्यमः। इति दुर्गादासः॥

शूरः,पुं, (शूरयति विक्रामतीति। शूर+अच्। यद्वा, शवति वीर्य्यं प्राप्नोतीति। शु+"शुसिचिमिञां दीर्घश्च।" उणा० २।२५। इति क्रन् दीर्घश्च।) वीरः। इत्यमरः॥ (यथा, महाभारते।१।१०९।४

"शूराश्च कृतविद्याश्च सन्तश्च सुखिनोऽभवन्॥")

यादवः। स तु श्रीकृष्णस्य पितामहः। इति मेदिनी॥ (यथा, भागवते।९।२४।२६।

"शूरो विदूरथादासीत् भजमानस्तु तत्सुतः॥")

सूर्य्यः। इति त्रिकाण्डशेषः॥ सिंहः। शूकरः। चित्रकः। सालः। लकुचः। मसूरः। इति राजनिर्घण्टः

शूरणः, पुं, (शूर्य्यते इति। शूर हिंसे+ल्युः।) मूलविशेषः। ओल इति भाषा। तत्पर्य्यायः। अर्शोघ्नः २ कन्दः ३। इत्यमरः॥ सूरणः ४। इति तट्टीका॥ ओलः ५। इति जटाधरः॥ ओलः ६। इति मेदिनी॥ कण्डूलः ७ कन्दी ८ सुकन्दी ९ स्थूलकन्दकः १० दुर्नामारिः ११ सुवृत्तः १२ वातारिः १३ कन्दशूरणः १४ तीव्रकण्ठः १५ कन्दार्हः १६ वान्दवर्द्धनः १७ बहुकन्दः १८ रुच्यकन्दः १९ शूरणकन्दः २०। अस्य गुणाः। कटुत्वम्। रुच्यत्वम्। दीपनत्वम्। पाचनत्वम्। क्रमिकफानिलश्वासकासवमनार्शः